National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 399-401
© 2026 NJHSR
www.sanskritarticle.com

**डॉ. सीहेच्. नागराजः**
सहाचार्यः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः।

**Correspondence:**
**डॉ. सीहेच्. नागराजः**
सहाचार्यः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः।

# विशिष्टाद्वैतसुधाकरो यामुनाचार्यः

**डॉ. सीहेच्. नागराजः**

**यत्पादाम्भोरुहध्यानविध्वस्ताशेषकल्मषः।**
**वस्तुतामुपयातोऽहं यामुनेयं नमामि तम्॥**
**यामुनार्यपदाम्भोजध्यानलब्धात्मभूतये।**
**रामानुजाय मुनये नमश्शेवधये सताम्॥**
**मानत्वं भगवन्मतस्य महतः पुंसस्तथा निर्णयः**
**तिस्रः सिद्धय आत्मसंविदखिलाधीशानतत्त्वाश्रयाः।**
**गीतार्थस्य च सङ्ग्रहः स्तुतियुगं श्रीश्रीशयोरित्यमून्**
**यद्ग्रन्थाननुसन्दधे यतिपतिस्तं यामुनेयं नुमः॥**

**उपोद्घातः -**

श्रीवैष्णवसम्प्रदायस्य सिद्धान्तव्योम्नि परिपूर्णज्योत्स्नासुषमया शोशुभ्यमानः आचार्यप्रवरः यामुनाचार्यो वर्तते। अयमाचार्यः ईश्वरमुनेरात्मजः नाथमुनेः पौत्रश्चासीत्। पितामहस्य अपारशेमुषीवैभवं विष्णुभक्तिपारम्यञ्च पौत्रमाविशदिति जनश्रुतिः सर्वथा अवितथैव। **चोळदेशे वीरनारायणपुर**ग्रामे **काट्टुमन्नानार्**मवति भगवदायतने अयं ९१८ तमे वर्षे जनिमवाप। अत्यन्त-बाल्यवयसि एव अयं डिम्भकः असाधारणप्रतिभासम्पन्नः सन् वैष्णवसिद्धान्तेषु विष्णुभक्तिवर्त्मनि च निजाधिक्येन सर्वानतिशिश्ये। एवं प्रवहता कालेन कौमारवयसि श्रीराममिश्रदेशिकेन्द्रान् निकषा वेदाध्ययनं विधाय महाभाष्यभट्टाचार्याणाम् अन्तेवासित्वे व्याकरणादिशास्त्रग्रन्थानध्यैष्ट। द्वादशवर्षीये सुकुमारवयस्येव अयमर्भकः निजवैदुष्येन निजाचरणपावित्र्येण च सर्वेषु महतीं प्रीतिमलभत।

अयं महानुभावः द्वितीयचोळमहाराजस्य आस्थाने शैवविद्वद्भिस्सह वैष्णवसम्प्रदायप्रमुखमतं विशिष्टाद्वैतमधिकृत्य महत्तरं शास्त्रार्थं विधाय तत्र प्राप्तविजयस्सन् सर्वत्र भुवि वैष्णवसम्प्रदायमहिमानं परिव्यापयत्। अस्याचार्यस्य षड्ग्रन्थाः षड्रुचय इव समाजकलेवरं भृशमुपकुर्वन्ति। सिद्धित्रयग्रन्थस्य एकैकसिद्धिप्रसङ्गं पृथग्गणयित्वा तत्रास्य आचार्यस्य अष्टौ ग्रन्थाः सन्तीत्यपि वादो वर्तते। परन्तु सिद्धित्रयम् आहत्य एकग्रन्थात्मना निश्चीय षड्ग्रन्था इति निर्णय एव साधीयान्। तत्रैतेषां लघीयसी परिचितिर्यथा –

१. **स्तोत्ररत्नम्** – ग्रन्थेऽस्मिन् पञ्चषष्टिश्लोकाः सन्ति। प्रायशः आधिक्येन भगवतो रूपगुणवर्णनेन सह यत्किञ्चिदात्मदोषप्रकटनमपि आचार्येणात्र बाढं व्यधायि।

२. **चतुश्श्लोकी** – लघुकायेऽस्मिन् ग्रन्थे भगवतीं भार्गवीं संस्तुवन्नाचार्योऽयं श्लोकचतुष्टय-मरीरचत्। लक्ष्मीनारायणयोः अलौकिकदिव्यदाम्पत्यवैभवं वर्णयन् अनेन काव्येन बहूनामपि संस्कृतस्तोत्र-प्रणेतॄणां कवीनामयं पथप्रदर्शकः समभवत्।

३. **सिद्धित्रयम्** – ग्रन्थेऽस्मिन् आचार्यः आत्मसिद्धिः, ईश्वरसिद्धिः, संवित्सिद्धिरिति त्रिधा विभज्य सिद्धित्रयं सम्यगुपापादयत्। संवित्सिद्धिप्रसङ्गे मायावादं खण्डयित्वा आत्मस्वरूपं स्फुटं न्यरूपयत्।

४. **गीतार्थसङ्ग्रहः** – विशिष्टाद्वैतसिद्धान्तदृशा गीतायाः रहस्योद्घाटनं ग्रन्थेऽस्मिन् आचार्येण अकारि।

**५. आगमप्रामाण्यम् –** यामुनाचार्याणां पाण्डित्यपरिणतिं वयमस्मिन् ग्रन्थे विलोकितुं शक्नुमः। पाञ्चरात्रसिद्धान्तप्रामाण्यमत्र विपुलतया सोपपत्तिकमचर्चि। परन्त्वयं ग्रन्थः पूर्णतया नोपलभ्यते।

**६. महापुरुषनिर्णयः –** ग्रन्थेऽस्मिन् भगवतो विष्णोः वैभवं सविस्तरमुपवर्णितमिति तद्ज्ञाः आचक्षीरन्। परमयं ग्रन्थः सम्प्रति नोपलभ्यते।

एतेषां ग्रन्थानामाधारेण एतद्व्याख्यानविशेषविचारैश्च आचार्यस्यास्य वैदुषीविभवं यथायोगमत्र परिशीलयामः।

तत्रादौ सम्प्रदायस्यास्य मूलाराध्यस्य सकलकळ्याणगुणार्णवस्य भगवतो नारायणस्य कुटुम्बिनीं भगवतीं मङ्गळदेवतामुद्दिश्य सङ्ख्यामुखेन चतुर्भिः अव्याजभावानुबन्धमहिम्ना चतुरैः श्लोकैः आचार्योऽयं निजान्तरङ्गस्थितभक्तितरङ्गिणीम् एतत्स्तोत्रात्मना प्राचीकटत्। तत्रत्यं तृतीयं श्लोकमिमं तावदवधारयन्तु सुहृदयाः.....

**ईषत्त्वत्करुणानिरीक्षणसुधासन्धुक्षणाद्रक्ष्यते**
**नष्टं प्राक्तदलाभतस्त्रिभुवनं सम्प्रत्यनन्तोदयम्।**
**श्रेयो न ह्यरविन्दलोचनमनःकान्ताप्रसादादृते**
**संसृत्यक्षरवैष्णवाध्वसु नृणां सम्भाव्यते कर्हिचित्॥**[1]

हे जगन्मातः! यावत्त्वदीयं कृपाकटाक्षाणाममृतं भूर्भुवरादिसमस्त-लोकेषु वसतां स्थावरजङ्गमात्मनां प्राणिनामुपरि न प्रसरति, तावत्ते सर्वात्मना नष्टचेतनाः अप्राप्तोदयाः ईषच्चलितुमप्यक्षमाः जायन्ते। परं यदा तेषु भवत्याः अव्याजकृपालहरीवीचयः निजविपृड्भिः कृतवसतयो भवन्ति, तदा ते सांसारिकसुखानि अनुभवितुम् आत्मनस्तत्त्वावबोधं लब्धुम्, अर्चिरादिमार्गैः प्रस्थाय मोक्षपदवी-मारोढुमपि भवत्याः श्रीवत्सलाञ्छनहृदयनियतवसतेः कृपामन्तरेण ते कथमपि क्षमाः न सम्भवन्ति।

ईदृशहृदयमर्मस्पर्शिभिः भावैः भगवद्भक्तिसुधामञ्जरीभिः अनन्य-मधुरानुभूतिभिश्च आचार्यैः रचितोऽयं ग्रन्थः वपुषा अल्पोऽपि संविद्रोचिषा अनल्पविभूतिभाजनमिति वक्तुं नास्ति विसंवादः।

सम्प्रति गीतार्थसङ्ग्रहग्रन्थमनुशीलयामश्चेत् द्वात्रिंशद्भिः श्लोकैः कलेवरेण अल्पोऽप्ययं ग्रन्थः गीतार्थविनिर्णये तदन्तर्गतब्रह्मोपदेश-प्रतीतौ च गरीयसीमुपकृतिं सकलप्राणिकोटेर्विधत्ते। तदस्य स्वरूपमेवमास्ते। यथा ग्रन्थेऽस्मिन् प्रथमश्लोकः गीताशास्त्रप्रधान-प्रतिपाद्यविषयनिरूपको वर्तते। तदनु क्रमेण श्लोकत्रयेण षट्कत्रयप्रतिपाद्यार्थं विशदीकरोत्याचार्यः। तत्पश्चादेकैकश्लोकेन एकैकाध्यायप्रतिपाद्यविषयं विवेचयति। एवमष्टादशाध्यायानाम् अष्टादशभिः श्लोकैः सङ्क्षिप्तसारसम्पत्तिं निरूप्य तदूर्ध्वं प्राधान्येन गीताशास्त्रे प्रतिपादितानां कर्मज्ञानभक्तियोगानां स्वरूपं तत्तद्विनियोगप्रकारं तत्तत्फलं च बोद्धनुष्ठातृसौकर्यार्थं दशभिः श्लोकैः विवृणोति। अयमस्य ग्रन्थस्याकारः। तत्रत्यः प्रधानप्रतिपाद्यनिरूपकः प्रथमश्लोको यथा –

**स्वधर्मज्ञानवैराग्यसाध्यभक्त्येकगोचरः।**
**नारायणः परं ब्रह्म गीताशास्त्रे समीरितः॥**[2]

ग्रन्थस्यास्य श्रीबालधन्वि-जग्गु-वेङ्कटाचार्यस्वामिना विरचितं व्याख्यानमत्र प्रस्तूयते। यथा -

**स्वस्य अनुष्ठातुः धर्माः स्वधर्माः। ज्ञानं च वैराग्यञ्चेति द्वन्द्वः। तैः साध्या या भक्तिः, तस्याः एकगोचरः प्रधानविषयः वेदान्तेषु जगत्कारणत्वादिना परब्रह्मशब्देन प्रतिपाद्यः, यस्स एव देवताविशेषः श्रियःपतिर्नारायण एव गीताशास्त्रे समीरितः, प्रतिपाद्यत इत्यर्थः।**

गीतायां स्वधर्मेण ज्ञानेन वैराग्येन च आत्मनः यथार्थमवलोकनं यः प्रमाता प्राप्नोति, स एव तं परमात्मानं जगदुत्पत्त्यादिकारणपरं नारायणं प्राप्नोतीति निष्पिण्डितार्थः। अस्यैव प्रधानप्रतिपाद्य-विषयस्य सुविस्तरं व्याख्यानं ग्रन्थेऽस्मिन्नाचार्येण प्रास्तावि। एवमेव अत्यन्तसङ्क्षेपेण शास्त्रदृशा लघुना उपायेन गीताशास्त्रस्य अन्तरङ्गं बोद्धव्यमिति चेत् गीतार्थसङ्ग्रहोऽयं भृशमुपकारी।

अध्यायषट्कस्य क्रमेण श्लोकत्रयेण आन्तर्यमुपपाद्य ततोऽध्यायाना-मष्टादशानां सारं निरूप्य सम्प्रति श्लोकदशकेन गीताशास्त्रस्य प्रधानप्रतिपाद्यत्वेन सर्वसम्मतानां कर्म-ज्ञान-भक्तियोगानां स्वरूपमत्र विचार्यते। तत्रत्यं किञ्चिदिदं पद्यं यथा –

**कर्मयोगस्तपस्तीर्थदानयज्ञादिसेवनम्। ज्ञानयोगो जितस्स्वान्तैः परिशुद्धात्मनिस्थितिः। भक्तियोगः परैकान्त्यप्रीत्या ध्यानादिषु स्थितिः।**[3]

**अत्र तपश्शब्देन "द्रव्ययज्ञास्तपोयज्ञाः" इत्युक्तं तपः, कृच्छ्रचान्द्रायणोपासनादिकं प्रतिपादितम्। तीर्थशब्देन "योगयज्ञाः" इत्युक्तं तीर्थक्षेत्रयात्रारूपं कर्म विवक्षितम्। दानशब्देन "द्रव्ययज्ञाः" इत्युक्तयागदानहोमान्तर्गतं दानं प्रतिपादितम्। यज्ञशब्देन "ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति" इत्युक्तो यागो होमश्च विवक्षितः। आदिशब्देन चतुर्थाध्यायोक्ताः " दैवमेवापरे" इत्यादिभिः प्रतिपादिताः प्राणायामपर्यन्ताः तपस्तीर्थदानयज्ञव्यतिरिक्ताः कर्मयोगभेदाः विवक्षिताः।**

**एवं कर्मयोगं निरूप्य ज्ञानयोगं विवृणोति। "ज्ञानयोग" इति लक्ष्यनिर्देशः। जितस्स्वान्तैरित्यनेन ज्ञानयोगाधिकारो दर्शितः। जितेन्द्रियत्वं तदधिकार इति यावत्। परिशुद्धात्मनि स्थितिरिति ज्ञानयोग-लक्षणमुक्तम्। परिशुद्धे प्रकृतिसंसर्गरहिते मुक्तात्मनि स्थितिर्नाम निरन्तरचिन्तनम्। तेन साधनदशायामेव ज्ञायमानो य आत्मसाक्षात्कारः आत्मावलोकनशब्दवाच्यः, फलदशायां ज्ञायमानः य आत्मानुभवरूपः कैवल्यमोक्षः तदुभयव्यावृत्तिः। इत्थं च ज्ञानयोगो नाम प्रकृतिविनिर्मुक्तात्मध्यानमिति फलितम्।**

**भक्तियोग इति लक्ष्यनिर्देशः। शेषं लक्षणम्। परस्मिन्नेकस्मिन्नेव अन्तो निश्चयः उपायत्वेनाध्यवसायो यस्य सः परैकान्तः, तस्य भावः परैकान्त्यम्। नारायणे एकस्मिन्नेवोपायाध्यवसायः, तेन जनिता या प्रीतिः, तया ध्यानादिषु ध्यानार्चनप्रणामनामसङ्कीर्तनादिषु स्थितिर्निरन्तरानुष्ठानं तदेव भक्तियोग इत्यर्थः।**

कर्मज्ञानभक्तियोगानां परस्परसङ्गमः अथवा त्रिषु एकस्य स्पष्टमवधारणमित्यादिपक्षाः अत्र न प्रस्तूयन्ते। गीताशास्त्रे प्राधान्येन सविस्तरमुपपादिताः इमे योगाः अत्राचार्येण अत्यन्तसुलभसरल-सङ्क्षिप्तशैल्या प्रतिपादिताः। स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति नैष्ठिकीमित्यादिना तपस्तीर्थज्ञानयज्ञादिरूपाणां कर्मणाम् अनुष्ठान-मेव कर्मयोगः। परमात्मनि निरन्तरतैलधारावच्छिन्नचित्तवृत्तिधारया तादात्म्यावाप्तिरेव ज्ञानयोगः। परमप्रेमरूपया भक्त्या तद्गुणचरित्र-कर्मसु निरवच्छिन्नचित्तलय एव भक्तियोग इति सारसम्पिण्डितार्थः।

**निरस्तनिखिलाज्ञानो दृष्ट्वात्मानं परानुगम्।**
**प्रतिलभ्य परां भक्तिं तयैवाप्नोति तत्पदम्॥**[4]

एतेषु त्रिषु योगेषु कर्मज्ञानयोगौ उभावपि साधकस्य संसारदेहमनोबुद्धीन्द्रियाणां समन्ततो नैर्मल्यम् उपपादयतः। एवं बाह्याभ्यन्तराभ्याम् उपपन्ननैर्मल्यगुणः सर्वात्मना तद्गतप्राणः तदन्तरात्मा साधकः सिद्धावस्थामितः सन् भक्तियोगेन तृतीयेन क्षपिताखिलदुष्कृतः सन् आत्मना परमात्मनि लीनः सन् अन्ततस्तयैव भक्त्या तत्परमपदमापद्यते। इदमेव योगानाममीषां पार्यन्तिक-फलमिति वेत्तव्यम्।

**भगवद्ध्यानयोगोक्तिवन्दनस्तुतिकीर्तनैः।**
**लब्धात्मा तद्गतप्राणमनोबुद्धीन्द्रियक्रियः॥**[5]

सर्वान्तरात्मनः विश्वविश्वम्भरादिसकलब्रह्माण्डभर्तुः आकीटब्रह्म-पर्यन्तनियामकस्य सर्वेश्वरस्य सर्वज्ञस्य सच्चिदानन्दप्रकृतेः तस्य निरन्तरध्यानेन पूर्वोक्तैर्योगैश्च वेदोक्तकर्माचरणेन अभिवादनेन तद्गुणकीर्तनेन च सिद्धः भक्तः सर्वकल्मषविदूरं सर्वतः शुद्धमेकमात्मानमपरमुपलभ्य स्वकीयप्रापञ्चिकवृत्तं समस्तमपहाय केवलम् ईश्वरार्पणधिया निजप्राणमनोबुद्धीन्द्रियाणां वृत्तीरवलम्ब-मान एव वस्तुतो गीताशास्त्रफलभागिति पार्यन्तिको विनिश्चयः।

आचार्येण यामुनेन प्रणातमिदमद्वितीयभक्तिभावसम्भृतं स्तोत्रकाव्यं स्तोत्ररत्नं नाम। तत्रत्यानपि द्वित्रान् श्लोकसुधाबिन्दून् सम्प्रत्यत्र विमृशामः।

**तत्त्वेन यस्य महिमार्णवशीकराणुः**
**शक्यो न मातुमपि शर्वपितामहाद्यैः।**
**कर्तुं तदीयमहिमस्तुतिमुद्यताय**
**मह्यं नमोऽस्तु कवये निरपत्रपाय॥**

महान्तोऽपि कवयः वरीयांसः भक्ताश्च न कदापि निजगुणेष्व-भिमानमीक्षन्ते। यथा मन्दः कवियशः प्रार्थी इत्यादिना महाकविः कालिदासः। एवमेव अयमपि भक्तकविः तस्य सकलगुणातिशयधाम्नः अधोक्षजस्य महिमार्णवजलकणपरमाणुमात्मानं विदित्वा तं च सकलगुणरत्नाकरं सर्वेश्वरञ्च प्रतिपद्य उभयोरान्तर्यं पृथिव्यन्तरिक्ष-योरिव महत्तरमध्यवस्य अतस्तादृशमहामहिमनिधिं लक्ष्मीपतिं स्तुवते मे निर्व्रीडाय नमोऽस्तु इत्यात्मनि प्रणामकथनं सोपपत्तिकम्।

**भवन्तमेवानुचरन्निरन्तरं प्रशान्तनिश्शेषमनोरथान्तरः।**
**कदाहमैकान्तिकनित्यकिङ्करः प्रहर्षयिष्यामि सनाथजीवितः॥**

श्लोकेऽस्मिन् भक्तकविनानेन शरणागतेः भगवत्सायुज्यभक्तेश्च यो भावः आविरकारि, सोऽयं सन्नतजनहृदयावर्जकः।

**उपसंहारः –**

विशिष्टाद्वैतसिद्धान्तमहाप्रासादस्य नाथमुनिः यामुनाचार्यः रामानु-जाचार्यः श्रीमद्वेङ्कटनाथाचार्यः श्रीवेङ्कटाध्वरी इत्यादयो महान्तो विद्वांसः स्तम्भायमानाः सन्ति। विशिष्टाद्वैतसिद्धान्तप्रतिष्ठापनप्रसङ्गे रामानुजाचार्योऽपि नाथमुनेः यामुनाचार्यस्य च पथि श्रद्धाभक्ति-समञ्चितेन चेतसा बाढं प्रचेलुः। अतोऽस्मिन् लेखे वाप्यापश्शशि-बिम्बनयेन यामुनाचार्याणां विद्वदाकृतिः यथामति विविक्तेति शम्।

**समुपात्तग्रन्थावलिः –**


१. आमुक्तमाल्यदलो विशिष्टाद्वैतसिद्धान्तप्रकाशनम् – डा. के. वेङ्कटाचार्य, स्वीयप्रकाशनम्, भाग्यनगरम्, २००४.

२. गीतार्थसङ्ग्रहः – श्रीबालधन्वि जग्गु वेङ्कटाचार्यस्वामी, प्रकाशकः – श्रीबालधन्वि जग्गु सुदर्शनाचार्यः, महीशूरपुरम्, १९७४.

३. चतुश्श्लोकी स्तोत्ररत्नं च – व्याख्याता – चक्रवर्ती वि. श्रीरङ्गनाथाचार्यः, प्रकाशकः – श्रीवैकुण्ठनाथ देवस्थान, कलकत्ता, १९७६.

४. सिद्धित्रयम्–व्या.वे.आ.पं.रामदुलारे शास्त्री, गोरक्षापुरम्, १९४३.


**पाद टिप्पणी**

[1]चतुश्श्लोकी – श्लोकसङ्ख्या - ३

[2]गीतार्थसङ्ग्रहः – श्लोकसङ्ख्या - १

[3]गीतार्थसङ्ग्रहः – श्लोकसङ्ख्या – २३,२४

[4]गीतार्थसङ्ग्रहः – श्लोकसङ्ख्या - २६

[5]गीतार्थसङ्ग्रहः – श्लोकसङ्ख्या - ३०